Lesson 6 : Part-1

## A Conversation

Here is the text of a simple conversation between two friends लक्ष्मि and विमला. Try and understand the conversation. Word meanings for new words are given at the end.

विमला - लक्ष्मि ! नमस्ते ।

लक्ष्मि - विमले नमस्ते । सुप्रभातं ते ।

विमला - सुप्रभातं । आगच्छ, अन्तः आगच्छ ।
अपि कुशलिनी ?

लक्ष्मि - आं अतीव कुशलिनी । त्वं कथं असि,
अन्ये च ?

विमला - आं अहमपि । सर्वत्र कुशलम् ।
लक्ष्मि चिराय त्वां पश्यामि ।

लक्ष्मि - का ते दूरवाणी सङ्ख्या ? सङ्ख्या नासीत् ।
अथः दूरवाणीम् कृत्वा आगन्तुं न शक्ता ।

विमला - चत्वारि नव शून्यं एकं त्रीणी पञ्च सप्त ।
4 9 0 1 3 5 7

लक्ष्मि - आं मम अपि इच्छा अस्ति त्वां द्रष्टुम् ।
अद्य अत्र नगरं आगता ।
अतः त्वां अपि द्रष्टुं आगता ।

विमला - कुत्र ते वासः ? जन्म गृहे वा ?

लक्ष्मि - न, अग्रजस्य गृहे । तस्य पुत्रस्य
प्रथमजन्मदिनं श्वः एव ।

विमला - सुष्टु , अतः ते दर्शनभाग्यं एवं खलु ?
अधुना किं पठसि ?

लक्ष्मि - संस्कृतं एम् .ए कक्ष्यायां प्रविष्टा ।

विमला - साधु , अहं अतीव सन्तुष्टा अस्मि,
यत् त्वं सस्कृतं एव पठसि इति ।

लक्ष्मि - इदानीं संस्कृते अभिरुचिः वर्धिता ।
इण्टर्नेट् माध्यमे अपि संस्कृत पाठः
अस्ति खलु ?

विमला - एवं वा ? संस्कृतस्य प्रचारः सर्वत्र अस्तु ।

Word meanings :
----------------

कथमसि - How are you ?

अन्ये च - others too

चिराय - in a long while

मम इच्छा अस्ति - I am anxious too

द्रष्टुम् - to see

जन्मगृहे = in the house where one is born
(reference to parents' house)

अग्रजस्य - elder brother's

प्रथमजन्मदिनं - first birthday

सुष्ठु - good

दर्शनभाग्यम् - a chance to see (भाग्य may actually be taken as lucky chance)

प्रविष्ठा - admitted (past tense)

साधु - well

सन्तुष्टा - happy

अभिरुचि - interest

वर्धिता - increased

In the above conversation, try and understand who is visiting who. Pick up some words from the conversation, which you can use in your own conversations in Sanskrit.

-----------------------------------------------------------------

Given below is a story. The story is likely to be a familiar one for those who have read many fables. The verbs in the story are all in the present tense and hence it is as if the story is a narration of what is happening. The words newly seen here will add to your vocabulary.

शशः कूर्मः च

एकदा एकस्मिन् वने एकः शशः अस्ति ।

तस्य मित्रं कूर्मः अस्ति ।

कूर्मः मन्दं चलति ।

किंतु शशः सर्वदा शीघ्रं धावति ।

एकस्मिन् दिने शशस्य कूर्मस्य च परस्परं

धावन स्पर्धा भवति ।
एकः वानरः निर्णयकः अस्ति ।
कूर्मशशौ वृक्षसमीपात् धावनं कुरुतः ।
जलाशायपर्यन्तं यत् दूरं अस्ति, तत् यः पूर्वं
प्राप्नोति, सः विजयी ।
शशः अतिशीघ्रं तस्य धावनं करोति ।
कः पूर्वं अन्तिमस्थानं आगच्छति ?
चिन्तनं कृत्वा एतत् वद ।
बहुदूरं धावित्वा शशः तिष्ठति ।
कूर्मः आगच्छति वा पश्यति ।
कूर्मः मन्दं मन्दं आगच्छति ।
शशः चिन्तयति, किञ्चित् विश्रान्तिं कृत्वा
गच्छामि इति ।
शशः वृक्षस्य मूले उपविशति ।
अज्ञात्वा शनैः निद्रां करोति ।
कूर्मः विश्रान्तिं विना मन्दं मन्दं चलति ।
ततः कूर्मः जलशयस्य समीपं स्वल्पसमयेन
आगच्छति ।
तदानीं शशः जाग्रति, शीघ्रं उत्थाय पश्यति ।
कूर्मः जलशयस्य समीपपर्यन्तं प्राप्नोति, सः
स्पर्धायां विजयी भवति ।
शशः शीघ्रं अवशिष्टस्य दूरस्य धावनं आरभते ।
किन्तु किं प्रयोजनम् ? शशस्य आगमनात् पूर्वं
कूर्मः विजयी भवति ।
निर्णयकः वानरः वदति, त्वं अलसः असि ।
मन्दं निरन्तरप्रयत्नेन स्पर्धायां विजयप्राप्तिः ।

एवं शनैः शनैः निरन्तरं पठित्वा संस्कृतभाषां
अपि सर्वे पठन्तु ।

---

Word Meanings:

शशः - rabbit

कूर्मः - Tortoise

एकदा - once upon a time

एकस्मिन् वने - in a forest

तस्य - his

मन्दम् - slowly

चलति - moves

शीघ्रम् - fast

परस्परम् - between each other

धावनस्पर्धा - running race

निर्णयकः - judge (umpire)

वृक्षसमीपात् - near the tree
(from a place near the tree)

जलाशयपर्यन्तम् - till the pond

दूरम् - distance

विजयी - winner

अन्तिमस्थानम् - finishing point

चिन्तनं कृत्वा - thinking over

बहुदूरम् - for a long distance

विश्रान्तिं - rest

वृक्षस्यमूले - at the bottom of the tree

अज्ञात्वा - unnoticed

निद्राम् - sleep

विश्रान्तिं विना - without taking rest

स्वल्पसमयेन - in a short time

तदानीं - then

उत्थाय - arising

अवशिष्टस्य दूरस्य - remaining distance

निरन्तरप्रयत्नेन - through constant effort

विजयप्राप्तिः - the attainment of success.

---

The conversation below is supposed to have taken place between Kalidasa, the undisputed king among the Poets of India who composed in Sanskrit, and a little girl.

Many things are obvious from the text seen, from literacy and education for girl children to the fact that writing was done on Palm leaves. There is no information available about Kalidasa’s time, though scholars have conjectured

times which vary from 1400 B.C to 700 A.D

The beauty of this often recited verse is its metrical structure. Some liberty has been taken by the Poet in the ordering of the words.

कालिदासः - का त्वं बाले ?
बाला - काञ्चनमाला ।
कालिदासः - कस्याः पुत्री ?
बाला - कनकलतायाः ।
कालिदासः - हस्ते किं ते ?
बाला - तालीपत्रम् ।
कालिदासः - का वा रेखा ?
बाला - का खा गा घा ।

The conversation is known through its form in verse.

का त्वं बाले काञ्चनमाला कस्याः पुत्री कनकलतायाः ।
हस्ते किं ते तालीपत्रं का वा रेखा का खा गा घा ॥

We give below the words rearranged for you to follow the conversation. The words in parantheses are implied.

बाले त्वं का ?
( अहं ) काञ्चनमाला ।
( त्वं ) कस्याः पुत्री ?
कनकलतायाः ( पुत्री )
ते हस्ते किं ( अस्ति ) ?
( मे हस्ते ) तालीपत्रं ( अस्ति )
( तत्र ) का वा रेखा ?
( तत्र ) का खा गा घा ।

तालीपत्रम् - Palm leaf (used for writing)
रेखा - letters ( of a script)

At this website, we have a page on Palm leaf manuscripts, in which you will see a leaf from a manuscript. Though small in size, the leaves often accommodate as many as fourteen to twenty

lines of text, where each line may have more than thirty syllables! The Multilingual Applications link seen below in the footer of the page has the details.

----------------------------------------------------------------

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मं ततः सुखम् ।

Learning gives modesty ; Through modesty does man attain worthiness; On account of worthiness, he gains wealth. With the ability to give for charity with his wealth, he gains happiness.

सुखार्थी चेत् त्यजेद् विद्यां विद्यार्थी चेत् त्यजेत् सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ॥

If you desire comfort, you should give up learning; Should you desire to acquire learning you should give up comfort. How can a person wanting comfort acquire learning? And how can a person enjoy comfort if he wants to learn?

आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥

A student gets a fourth of his learning from his teacher; a fourth through his own intellectual efforts, another fourth from his class-mates and the last fourth in course of time.

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तकाले सम्प्राप्ते काकः काकः पिकः पिकः ॥

The crow is black, the cuckoo is black. What is the difference between the two then? At spring time, a crow will be a crow and a cuckoo, a cuckoo!